https://www.mpboardonline.com

# अर्द्धवार्षिक परीक्षा – 2019–20
## कक्षा – 10वी
## विषय– संस्कृत (सामान्यम्)

समयः–घण्टात्रयम् | पूर्णाङ्कः–100

**निर्देशः–**

1. सर्वे प्रश्नाः अनिवार्याः सन्ति।
2. प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

प्र01 उचित विकल्पं चित्वा लिखत – (1X5=5)

1. "अत्याचारः" इत्यस्मिन् पदे का सन्धिः?
   (अ) गुणसन्धिः (ब) दीर्घसन्धिः (स) यणसन्धिः (द) वृद्धिसन्धिः
2. व्यञ्जनसन्धेः उदाहरणम् अस्ति –
   (अ) नमस्ते (ब) उल्लासः (स) विद्यालयः (द) कोऽपि
3. "महर्षिः" इत्यस्य पदस्य सन्धि–विच्छेदः स्यात् –
   (अ) मह+अर्षिः (ब) म+हर्षिः (स) मह+ऋषिः (द) महा+ऋषिः
4. 'नमः+ते' इत्यस्य सन्धिरूपं स्यात् –
   (अ) नमते (ब) नमस्कारः (स) नमस्ते (द) नमोऽते
5. अधोलिखितेषु अव्ययम् अस्ति –
   (अ) सः (ब) च (स) निशा (द) ल

प्र02 उचित विकल्पं चित्वा लिखत – (1x5=5)

1. तत्पुरूष समासस्य उदाहरणम् अस्ति–
   (अ) त्रिभुवनम् (ब) पितरौ (स) जलमग्नः (द) चन्द्रशेखरः
2. ' पितरौः' इत्यस्य समास विग्रहं स्यात् –
   (अ) माता च पिता च (ब) माता पिता च (स) माता च पिता द) पिता च पिता च
3. 'त्रिभुवनम्' इत्यस्मिन् कः समासः ?
   (अ) द्वन्द्व (ब) कर्मधारयः (स) बहुब्रीहि (द) द्विगु
4. 'अनुभवः' इत्यस्मिन् कः उपसर्गः ?
   (अ) अ (ब) अनुभ (स) भवः (द) अनु
5. अधोलिखितेषु उपसर्गः अस्ति –
   (अ) प्र (ब) प्रा (स) असि (द) अग्निः

प्र03 उचित विकल्पं चित्वा लिखत – (1x5=5)

1. "पास्यति" इत्यस्मिन् धातुः अस्ति–
   (अ) पिब् (ब) पा (स) पी (द) पास्
2. "पठतु" इत्यस्मिन् कः लकारः ?
   (अ) लोट् लकारः(ब) लृट् लकारः (स) लङ् लकारः (द) लट् लकारः
3. "रमन्ति" इत्यस्मिन् पदे पुरूषः अस्ति–
   (अ) उत्तमपुरूषः (ब) मध्यमपुरूषः (स) प्रथमपुरूषः द) महापुरूषः
4. "नमामि" इत्यस्मिन् पदे वचनम् अस्ति–
   (अ) एकवचनम् (ब) बहुवचनम् (स) द्विवचनम् (द) अमृतवचनम्
5. "विद्या माता इव रक्षति" इत्यस्मिन् वाक्ये अव्ययम् अस्ति –
   (अ) इव (ब) रक्षति (स) माता (द) विद्या

प्र04 उचित विकल्पं चित्वा लिखत– (1x5=5)

1. "पठितवान् इत्यस्मिन् कः प्रत्ययः ?
   (अ) क्त (ब) मतुप् (स) क्तवतु (द) शानच्

https://www.mpboardonline.com

2. 'तुमुन्' प्रत्ययस्य उदाहरणम् अस्ति –
   (अ) पठितव्यम् (ब) गन्तुम् (स) आदाय (द) गत्वा
3. 'बाला' इत्यस्मिन् प्रत्ययः अस्ति–
   (अ) मतुप् (ब) क्त (स) आप् (द) टाप्
4. "अनीयर्" प्रत्ययस्य उदाहरणम् अस्ति –
   (अ) दर्शनीयम् (ब) लिखितुम् (स) हसित्वा (द) गन्तव्यम्
5. परसदननिविष्टः को ..................न याति?
   (अ) गरूत्वं (ब) लघुत्वं (स) हसित्वं (द) महत्त्वं

प्र05 प्रदत्तैः शब्दैः रिक्तस्थानं पूर्तिः कुरूत –
(पापेऽपि, सूर्यदेवः, साधकं, जितक्रोधेन, समयः) (1X5=5)
1. .................... सर्वं हि जगदेतद्विजीयते।
2. अन्येषां वस्तूनाम् अपेक्षया .................... अधिकः महत्वपूर्णः वर्तते।
3. न ....................... पापी स्यात्।
4. भारतीयैकता..................... संस्कृतम्।
5. ........................... प्रकाशं प्रयच्छति।

प्र06 अधोलिखितेषु प्रश्नेषु त्रयाणाम् प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् एकवाक्येन लिखत– (2X3=6)
1. दयानन्दस्य जन्मनाम किम् आसीत् ?
2. कः वृष्टिं वर्षति ?
3. कस्य अभिनिष्क्रमणसंस्कारः अस्ति ?
4. अस्माकं सर्वेषां जननी का ?
5. कः मृतोऽपि जीवति ?

प्र07 अधोलिखितु द्वयोः शब्दयोः शब्दरूपाणि त्रिषु वचनेषु लिखत– 2
1. किम् –(पुल्लिङ्गः) – षष्ठी विभक्तिः
2. राम् – द्वितीया विभक्तिः
3. रमा – प्रथमा विभक्तिः

प्र08 'रामाणाम्' अथवा 'कविना' इति पदस्य विभक्तिं वचनं च लिखत– 2

प्र09 अधोलिखितेषु गद्यांशेषु गद्यांश द्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत – (5X2=10)

(क) गङ्गातीरे मार्कण्डेय नाम कश्चन मुनिः वसति स्म। तस्य गुरूकुले बहवः शिष्याः आसन्। वासुदेवः तस्य प्रिय शिष्यः। तस्य द्वादशवर्षात्मकम् अध्ययनं यदा समाप्तं तदा गुरूः तम् आहूय अवदत्–"शिष्य! अधुना भवान् सर्वविद्यापारङ्गतः अस्ति। अतः इतः परं स्वग्रामं गन्तुम् अर्हति भवान्।
1. गङ्गातीरे कः वसति स्म?
2. कस्मिन् बहवः शिष्याः आसन्?
3. कः तस्य प्रियशिष्याः?
4. अधुना कः सर्वविद्यापारङ्गतः अस्ति?
5. 'गुरूकुले' इत्यस्मिन् का विभक्तिः?

(ख) वरूणदेवः वृष्टिं वर्षति। सूर्यदेवः प्रकाशं प्रयच्छति। भूमाता वृक्षस्य आधारभूता अस्ति। वायुः अनिलं ददाति। ते सर्वे पालयन्ति पोषयन्ति रक्षन्ति च। ते न कदापि "मम अधिकारः वर्तते" इति अवदन्। ते सर्वे परोपकारिणः।
1. कः प्रकाशं प्रयच्छति?
2. वरूणदेवः किं वर्षति?
3. वृक्षस्य आधारभूता का?

https://www.mpboardonline.com
https://www.mpboardonline.com

4. ते सर्वे किं कुर्वन्ति?
5. 'वृक्षस्य' इतिशब्दस्य विभक्तिं वचनं च लिखत।

(ग) जनाः द्विधा समयस्य दुरुपयोगं कुर्वन्ति–व्यर्थयापनेन अकार्यकारणेन च। अनेके जनाः कार्यसम्पादने समर्था आपे निरर्थकं समयं यापयन्ति। इतो भ्रमन्ति ततो भ्रमन्ति अप्रयोजनं गृहे–गृहे अटन्ति। न ते स्वार्थाय एव किञ्चित् कार्यं कुर्वन्ति न वा परार्थाय एव। देवदुर्लभमिदं मानव शरीरं लब्ध्वापि ये न अध्ययनं कुर्वन्ति न धर्मम् आचरन्ति न धनम् उपार्जयन्ति न वा मुक्तये प्रयासं कुर्वन्ति तेषां जन्म निरर्थकं भवति तथा इयं कर्मभूमिः एतादृशानां निष्क्रियाणां भारं वोढुं नेच्छति।

1. देवदुर्लभं किं?
2. ये मुक्तये प्रयासं न कुर्वन्ति तेषां जन्म कीदृशः भवति?
3. जनाः कतिधा समयस्य दुरूपयोगं कुर्वन्ति ?
4. अनेके जनाः अप्रयोजनं कुत्र अटन्ति?
5. कर्मभूमिः केषां भारं वोढुं नेच्छति?

प्र010 अधोलिखितेषु पद्यान्शेषु पद्यान्श द्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (5X2=10)

(क) युवान एष वः परीक्षणस्य काल आगतः
हिमालयस्य रक्षणे समुद्यताः स्थ सर्वतः।
अयं सखा पुरातनोऽस्य भारतस्य विद्यते
स्वकर्मणि प्रवर्तितुं कदापि नैव खिद्यते।।

1. युवान एव वः कस्य काल आगतः?
2. भारतस्य पुरातनः सखा कः विद्यते?
3. कस्मिन् प्रवर्तितुं कदापि न खिद्यते?
4. कस्य रक्षणे वः समुद्यताः?
5. "नैव" इत्यस्य सन्धि–विच्छेदं कुरू?

(ख) गङ्गा पापं शशी तापं दैन्यं कल्पतरूस्तथा।
पापं तापं च दैन्यं च हनन्ति सन्तो महाशयाः।।

1. गङ्गा किं हन्ति?
2. कः तापं हन्ति?
3. कल्पतरूः किं हन्तिः?
4. सन्तः कानि हनन्ति?
5. 'हन्ति' इत्यस्मिन् कः लकारः?

(ग) प्रारभ्यते न खलु विघ्नभयेन नीचैः,
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरापि प्रतिहन्यमाना,
प्रारभ्य चोत्तमजनाः न परित्यजन्ति।।

1. कैः विघ्नभयेन न प्रारभ्यते?
2. के प्रारभ्य न परित्यजन्ति?
3. मध्याः विघ्नविहता किं न कुर्वन्ति?
4. कैः प्रतिहन्यमाना उत्तमजनाः न परित्यजन्ति?
5. 'प्रारभ्य' इत्यस्मिन् कः प्रत्ययः?



प्र011 युग्ममेलनं कुरूत–(कोऽपि चत्वारः)

(क) मनः ज्योतिषाम् (i) न स्यात्

https://www.mpboardonline.com
https://www.mpboardonline.com

(ख) दीर्घसूत्री (ii) सार्द्धत्रिवादनम्
(ग) गङ्गातीरे (iii) एकं ज्योतिः
(घ) (iv) गुरुकुलम्
(ङ) मित्रम् (v) प्रीतिरससायनम्

प्र012 शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत – 4

1. अस्माभिः समयस्य सुदुपयोगः कर्त्तव्यः।
2. धनेन अमृतत्वं प्राप्यते।
3. मे मनः शिवसंकल्पं न अस्तु।
4. महर्षेः ख्यातिः सर्वत्र व्याप्रा अस्ति।

प्र013 अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानां उत्तराणि संस्कृत भाषायाम् एकपदेन लिखत – 4

1. जलं विना किं न सम्भवम्?
2. मनसः ऋते किंचन किं न क्रियते?
3. जनाः प्रतिदिनं कं स्मरन्ति स्म?
4. रथकारस्य नाम किम् आसीत्?
5. घनोपगूढं किम्?
6. प्रकृतिदत्तः वरः कः?

प्र014 प्रशनपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभोषितद्वयं लिखत। 4

प्र015 स्वस्य प्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृतभाषायां लिखत। 4

अथवा

स्वपुत्रस्य जन्मदिवसोत्सवस्य अवसरे स्वमित्राय आमंत्रणपत्रं संस्कृते लिखत।

प्र016 अधोलिखितेषु "पञ्च" अशुद्धकारकवाक्यानां शुद्धिः करणीया – (1X5=5)

1. अहम् आपणं गच्छति।
2. ईश्वरं नमः।
3. अध्यापकं सह छात्राः गच्छन्ति।
4. वृक्षस्य पत्रं पतति।
5. धिक् ! ज्ञानहीनाय।
6. कृष्णं मोदकं रोचते।

प्र017 अधोलिखित वाक्यानां कथनानुसारेण क्रमसंयोजनं कुरुत– (1X5=5)

1. उष्ट्रः यूथाद् भ्रष्टोऽभवत्।
2. सिंहेन उष्ट्रः मारितः।
3. तेन प्रचुरा उष्ट्रः करभाश्च सम्मिलिताः।
4. वने प्रसववेदनया पीड्यमानाम् उष्ट्रीम् अपश्यत्।
5. रथकारः दारिद्र्योपहतः देशान्निष्क्रान्तः।

प्र018 अधोलिखित अपठितं गद्यांश सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (1X5=5)
अस्मिन् जगति सर्वधनेषु विद्यैव सर्वश्रेष्ठं धनम्। विद्याधनने विहीनः यः मानवः अस्ति सः मुर्खः असभ्यः इति कथ्यते। ज्ञानेन विना यथा पशुः धर्म–अधर्मयोः विचारं कतुं न शक्नोति तथैव मानवोऽपि विद्यया



https://www.mpboardonline.com
https://www.mpboardonline.com

https://www.mpboardonline.com

विहीनः पापपुण्ययोः कर्त्तव्य–अकर्त्तव्ययोः विचारं कर्तुं न समर्थः। विद्याविहीनः मानवः अन्धः एवं इति कथ्यते।

1. उपर्युक्तगद्यांशस्य शीर्षकं लिखित।
2. पशुः कयोः विचारं कर्तुं न शक्नोति?
3. कीदृशः मानवः अन्धः एवं इति कथ्यते?
4. सर्वधनेषु विद्या कीदृशं धनम्?
5. 'ज्ञानेन' इत्यस्मिन् का विभक्तिः?

प्र019 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – 10

1. अनुशासनम्
2. मम दिनचर्या
3. संस्कृत भाषायाः महत्त्वम्
4. महाकविः (कालिदासः)

——XXXX——

https://www.mpboardonline.com
https://www.mpboardonline.com
https://www.mpboardonline.com